॥ श्री जिनाय नमः ॥

# ॥ श्री दीपालिकाकल्पः ॥

( भाषांतरसहितः )

( मूळकर्त्ता श्रीजिनसुंदरसूरिः )

—भाषांतरकर्त्ता तथा छपावी प्रसिद्ध कर्त्ता—

पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

विक्रम् संवत् १९८२ (हालारी) वीर संवत् २४५१ सने १९२५.

मूल्यम् रु. २-०-०

श्री जैन भास्करोदय प्रिन्टिंग प्रेस—जामनगर.

॥ श्रीजिनाय नमः ॥

( गुर्जरभाषांतरोपेतः )

# ॥ श्रीदीपालिकाकल्पः प्रारभ्यते ॥

( मूळकर्त्ता-श्रीजिनसुंदरसूरिः )

भाषांतर कर्त्ता तथा छपावी प्रसिद्ध कर्त्ता-पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीवर्द्धमानमांगल्य-प्रदीपः पीवरद्युतिः ॥ देयादतुलकल्याण-विलासं विपुलं सतां ॥ १ ॥

अतिशय कांतिवाळा एवा श्रीमान् वर्धमानप्रभुरूपी मंगलकारी दीपक सज्जनोना विस्तीर्ण अने अनुपम कल्याणना विलासने आपो ! ॥ १ ॥

श्रीवर्द्धमानतीर्थेश-कल्याणकमहोत्सवं ॥ वक्ष्ये दीपालिकाकल्पं । पुण्यलक्ष्मीफलद्रुमं ॥ २ ॥

श्री वर्धमान तीर्थंकरना ( निर्वाण ) कल्याणकना महोत्सववाळो, तथा पवित्र लक्ष्मीनुं फल आपवा माटे कल्पवृक्ष सरखो एवो दीवाळीकल्प हुं कहीश. ॥ २ ॥

स्वश्रिया स्वर्गजयिनी । नाम्नास्त्युज्जयिनी पुरी ॥ संप्रतिर्भूपतिस्तत्र । प्रतापतपनोपमः ॥ ३ ॥

पोतानी शोभाथी स्वर्गने ( पण ) जीतनारी एवी उज्जयिनी नामनी नगरी छे, अने त्यां प्रतापथी सूर्य समान संप्रतिनामे राजा हतो. ॥ ३ ॥

तस्यामार्यसुहस्त्याह्वाः । सूरयो गुणभूरयः ॥ जीवतः स्वामिनो मूर्त्तिं । नंतुं वीरविभोर्गताः ॥ ४ ॥

( एक समये ) ते नगरीमां घणा गुणोवाळा श्रीआर्यसुहस्ति नामना आचार्य श्रीवीरप्रभुनी जीवंतस्वामिनी मूर्तिने नमस्कार करवा माटे गया. ॥ ४ ॥

जिनेशरथयात्रार्थ–मन्यदा तत्र सूरयः ॥ सहाऽनघेन संघेन । प्रस्थिता राजवर्त्मनि ॥ ५ ॥

त्यां एक समये ते आचार्य महाराज तीर्थंकरप्रभुनी रथयात्रा माटे निर्मल संघ साथे राजमार्गमां चालता हता. ॥ ५ ॥

सूरीनालोक्य संजात–जातिस्मृतिरिलापतिः ॥ आगत्य संप्रतिर्नत्वा । भक्त्या चेति व्यजिज्ञपत् ॥ ६ ॥

( ते वखते ) ते आचार्यमहाराजने जोइने थयेल छे जातिस्मरणज्ञान जेमने एवा ते संप्रतिराजाए ( तेमनी) पासे आवीने तथा भक्तिथी नमीने ( तेमने ) एवी विनंति करी के, ॥ ६ ॥

यूयं जानीत मां पूज्या । इत्युक्ते क्षितिपेन ते ॥ वदंतिस्म गुरुश्रेष्टाः । कस्त्वां वेत्ति न संप्रते ॥७॥

हे पूज्य! आप मने ओळखो छो? एम राजाए कहेवाथी ते उत्तम गुरुमहाराजे कह्युं के, हे संप्रतिराजा! तमोने कोण ओळखतुं नथी? ॥ ७ ॥

पृछामि ज्ञानपारीणा । विशेषेणोपलक्षणं ॥ इति राज्ञोदिते ज्ञात्वा । श्रुतेन सूरयोऽभ्यधुः ॥ ८ ॥

त्यारे राजाए फरीने कह्युं के, हे महाज्ञानी पूज्य! हुं विशेष प्रकारे मारी ओळखाण पूछुं छुं, एम राजाए कहेवाथी ते आचार्यमहाराजे श्रुतज्ञानथी जाणीने कह्युं के, ॥ ८ ॥

शिष्योऽस्माकं सुसंवेगो । भूप पूर्वभवेऽभवः ॥ दक्ष दीक्षानुभावेन । त्वमभूरत्र भूपतिः ॥ ९ ॥

हे राजन्! तमो पूर्वभवमां उत्तम वैराग्यवाळा अमारा शिष्य हता, तथा हे विचक्षण! दीक्षाना प्रभावथी तमो अहीं राजा थया छो. ॥ ९ ॥

एवं गुरूक्तमाकर्ण्य । स्वकर्णाभ्यां सकर्णधीः ॥ सूरीन् भूरिकृतप्रीति–रुवाच वचनं नृपः ॥ १० ॥

ए रीतनुं गुरुमहाराजनुं वचन पोताना बन्ने कर्णोथी सांभलीने ते विचक्षण राजाए गुरुप्रते घणो प्रेम लावी वचन कह्युं के, ॥१०॥

द्रमकेण कराकेण । मया राज्यमिदं मुने ॥ भवदीयप्रसादेना-ऽवापे पापेतरात्मना ॥ ११ ॥

हे मुनिमहाराज! एक कंगाल भिक्षुक, परंतु पुण्यशाली एवा में आपनी कृपाथी आ राज्य मेळव्युं छे. ॥ ११ ॥

राज्यं तदिदं गृह्णीध्व-मनुगृह्णीत मां विभो ॥ इत्युदंतं वदंतं त-माचार्या नृपमूचिरे ॥ १२ ॥

माटे हे प्रभु! आप आ राज्य ग्रहण करो? अने मारापर कृपा करो? ए रीतनुं वृत्तांत कहेता एवा ते राजाने आचार्य महाराजे कह्युं के, ॥ १२ ॥

नेहामः स्वल्पधि राज्यं । वयं देहेऽपि निःस्पृहाः ॥ पुण्यादाप्तं यतो राज्यं । तत्पुण्ये प्रवणो भव ॥१३॥

हे निर्मल बुद्धिवाळा राजन्! अमोने राज्यनी इच्छा नथी, केमके अमोने अमारां शरीरपर पण ममता नथी, माटे जे पुण्यथी तमोने राज्य मळ्युं छे, ते पुण्य ( करवामां ) तमो सावधान थाओ? ॥ १३ ॥

सम्यक्त्वं निर्मलं धार्यं । पूजनीया जिनेश्वराः ॥ सेव्याः सुसाधवः कार्यो । धर्मो दानादिकः सदा ॥१४॥

वळी तमारे निर्मल सम्यक्त्व धारण करवुं, जिनेश्वरप्रभुओनी पूजा करवी, उत्तम साधुओने सेववा, तथा हमेशां दान-आदिकरूप धर्मने धारण करवो. ॥ १४ ॥

धर्मश्चैष विशेषेण । कर्त्तव्यः सर्वपर्वसु ॥ एवं गुरूदिते प्राह । संप्रतिर्जातसंशयः ॥ १५ ॥

वळी आ धर्म सघळा पर्वोने विषे विशेष प्रकारे करवो, एवी रीते गुरुमहाराजे कहेवाथी ते संप्रति राजाए ( मनमां ) संशय लावी कह्युं के, ॥ १५ ॥

वार्षिकादीनि पर्वाणि । विख्यातानि जिनागमे ॥ ख्यातं दीपालिकापर्व । लोके लोकोत्तरे कुतः ॥१६॥

हे भगवन्! वार्षिक ( पर्युषणा ) आदिक पर्वो तो जिनागममां प्रख्यात छे, परंतु दीवाळीनुं पर्व लोकोमां तथा लोकोत्तरमां शामाटे प्रख्यात थयेलुं छे? ॥ १६ ॥

चीवराणि वराणीह । भूषणानि जनः कुतः ॥ परिधत्ते विभूष्यंते । पशुगेहद्रुमादयः ॥ १७ ॥

वळी आ पर्वमां लोको उत्तम वस्त्रो तथा आभूषणो शामाटे पहेरे छे? तथा पशुओ, घर तथा वृक्षआदिकने शामाटे शणगारमां आवे छे? ॥ १७ ॥

सूरयोऽथ वदंतिस्म । दीपालिपर्व विश्रुतं ॥ जज्ञे येन प्रबंधेन । शृणु तं धरणीधव ॥ १८ ॥

त्यारे गुरुमहाराजे कह्युं के, हे राजन्! जे कारण माटे आ दीवाळीपर्व प्रख्यात थयुं छे, तेनो संबंध तमो सांभळो? ।१८।

श्रीवीरः प्राणतस्वर्ग-पुष्पोत्तरविमानतः ॥ च्युत्वाषाढे सिते पक्षे । षष्ठ्यां हस्तोत्तरोक्षुनि ॥ १९ ॥
कुंडग्रामेशसिद्धार्थ-त्रिशलाकुक्षिकंदरे ॥ उत्पेदे त्रिशलादेवी । स्वप्नानेतान् व्यलोकयत् ॥ २० ॥
सिंहो गजो वृषः श्रीः स्रक् । शशी भानुर्ध्वजो घटः ॥ सरोंभोधिविमाने च । रत्नौघोऽग्निरिति
क्रमात् ॥ २१ ॥ त्रिभिर्विशेषकं ॥

श्रीमहावीर प्रभु प्राणतस्वर्गना पुष्पोत्तर नामना विमानथी चवीने अषाड शुद छठ्ठने दिवसे हस्तोत्तरा नक्षत्रमां, ॥१९॥ कुंडग्रामना अधिपति सिद्धार्थराजानी त्रिशला नामनी राणीनी कुक्षिमां उत्पन्न थया, ते वखते ते त्रिशलाराणीए आ प्रमाणे स्वप्नो जोयां. ॥ २० ॥ सिंह, हाथी, वृषभ, महालक्ष्मी, पुष्पमाला, चंद्र, सूर्य, ध्वज, कळश, पद्मसरोवर, क्षीरसमुद्र, विमान, रत्नोनो समूह, अने अग्नि, एम अनुक्रमे जाणवां. ॥ २१ ॥

एवं चतुर्दस्वप्न-सूचितस्य जिनेशितुः ॥ चैत्रे मासे त्रयोदश्यां । जन्म पक्षे सितेऽजनि ॥ २२ ॥

ए रीते चौद स्वप्नोथी सूचित थयेला एवा ते श्रीजिनेश्वर प्रभुनो चैत्रमासनी सुद तेरसने दिवसे जन्म थयो. ॥ २२ ॥

जिनेशजन्म विज्ञाया-ऽवधिज्ञानेन तोषतः ॥ समग्रदिक्कुमारीभि-र्जन्मकृत्यानि चक्रिरे ॥ २३ ॥

ते वखते अवधिज्ञानथी जिनेश्वरप्रभुनो जन्म जाणीने संतोष पामी सर्व दिक्कुमारीओए तेमनां जन्म कार्यो कर्यां.॥२३॥

अवधिज्ञानतो ज्ञात्वा । विदधे विबुधाधिपैः ॥ कल्याणाचलचूलायां । जन्मस्नात्रोत्सवः प्रभोः ॥२४॥

वळी इंद्रोए अवधिज्ञानथी ते वृत्तांत जाणीने प्रभुना जन्मनो स्नात्रमहोत्सव मेरुपर्वतना शिखरपर कर्यो. ॥ २४ ॥

यथार्थं पितरौ राज्य–लक्ष्मीभोगादिवृद्धितः ॥ नामधेयं विधत्तःस्म । वर्द्धमान इति प्रभोः ॥ २५ ॥

राज्य, लक्ष्मी तथा भोग आदिकनी वृद्धि थवाथी मातापिताए ते प्रभुनुं " वर्धमान " एवुं यथायोग्य नाम पाड्युं. ॥२५॥

अनंतसत्वधीरत्व–चमत्कृतबलद्विषा ॥ अवर्द्धत्त विभुर्दत्त–महावीरापराह्वयः ॥ २६ ॥

अनंत बल तथा धैर्यथी चमत्कार पामेला इंद्रे आपेलुं छे " महावीर " एवुं बीजुं नाम जेमने एवा ते प्रभु वृद्धि पामवा लाग्या. ॥ २६ ॥

भोगयोग्यं विभुं मत्वा । पिता मुदितमानसः ॥ राजकन्या यशोमत्या । पाणिग्रहमचीकरत् ॥२७॥

पछी भगवानने भोग भोगववा लायक ( उमर लायक ) जाणीने ( तेमना पिताए ) मनमां खुशी थइ यशोमती नामनी राजकन्या साथे तेमनुं पाणिग्रहण कराव्युं. ॥ २७ ॥

सुपार्श्वाह्वः पितृव्योऽभू–दग्रजो नंदिवर्द्धनः ॥ स्वसा सुदर्शना जज्ञे । पत्नी नेतुर्यशोमती ॥ २८ ॥

ते भगवानना सुपार्श्व नामे काका हता, नंदिवर्धन नामे महोटा भाइ हता, सुदर्शना नामे तेमनी बहेन हती, अने यशोमती नामे स्त्री हती. ॥ २८ ॥

**प्रियदर्शनया साकं । कुटुंबयुतयाभवन् ॥ वीरस्य वसतो वेश्म–न्यष्टाविंशतिवत्सराः ॥ २९ ॥**

कुटुंबसहित प्रियदर्शनानी साथे भगवानने गृहस्थावासमां वसतां थकां अठ्ठावीश वर्षो व्यतीत थयां. ॥ २९ ॥

**द्युलोकं प्राप्तयोः पित्रोः । संपूर्णाभिग्रहः प्रभुः ॥ नंदिवर्द्धनभूपेन । स्थापितो वत्सरद्वयं ॥ ३० ॥**

मातपिता देवलोके गयाबाद संपूर्ण अभिग्रहवाळा भगवानने नंदिवर्धन राजाए बे वर्षोसुधी राख्या. ॥ ३० ॥

**तीर्थं प्रवर्त्तयेत्युक्त–स्तत्र लोकांतिकामरैः ॥ दानं प्रवर्त्तयामास । यावत्संवत्सरं प्रभुः ॥ ३१ ॥**

पछी त्यां हे भगवन्! तीर्थ प्रवर्तावो? एम लोकांतिक देवोए कहेवाथी भगवाने एक वर्ष सुधी दान आप्युं. ॥ ३१ ॥

**ततषष्टतपा देव–कृतनिष्क्रमणोत्सवः ॥ ज्ञातखंडवने प्राप । शिबीचंद्रप्रभाश्रितः ॥ ३२ ॥**

त्यारबाद करेल छे छठ्ठनो तप जेमणे अने देवोए करेल छे दीक्षामहोत्सव जेमनो एवा ते प्रभु चंद्रप्रभा नामनी पालखीमां बेशीने ज्ञातखंड नामना उद्यानमां आव्या. ॥ ३२ ॥

**मार्गशीर्षे सिते स्वामी । तपस्यां दशमीतिथौ ॥ तुर्ययामेऽग्रहीदह्न–श्चतुर्थं ज्ञानमाप च ॥ ३३ ॥**

त्यां मागशरसुदी दशमने दिवसे चोथे पहोरे भगवाने दीक्षा लीधी, तथा चोथुं ( मनःपर्यव ) ज्ञान पाम्या. ॥ ३३ ॥

कोल्लागाह्ववरग्रामे । द्वितीयदिवसेऽजनि ॥ वीरस्य बहुलावासे । परमान्नेन पारणम् ॥ ३४ ॥

पछी बीजे दिवसे कोलाग नामना उत्तम गाममां बहुल नामना ( ब्राह्मणने ) घेर भगवानतुं खीरवडे पारणु थयुं. ॥ ३४ ॥

गोपालकौशिकशूल–पाणिसंगमकामरैः ॥ नैकशः क्षोभ्यमाणोऽपि । न ध्यानात्प्रचुरच्चुतत् ॥३५॥

पछी गोवाळीया, चंडकौशिक, शूलपाणियक्ष तथा संगमक देवे अनेक प्रकारे उपसर्ग कर्या छतां पण भगवान ध्यानथी क्षोभ पाम्या नही. ॥ २५ ॥

एवं तातप्यमानस्य । तपो वीरस्य दुस्तपं ॥ पक्षाधिकानि सार्द्धानि । वर्षाणि द्वादशात्यवन् ॥३६॥

ए रीते आकरो तप तपता एवा ते महावीरप्रभुना एक पखवाडीयांथी अधिक एवां साडाबार वर्षो व्यतीत थयां. ॥३६॥

उपर्जुवालिकातीरे । श्यामाकस्य कुटुंबिनः ॥ अधस्तात्सालतरोः क्षेत्र–सीम्नि वीरजिनेशितुः ॥ ३७ ॥

गोदोहिकासनस्थस्य । षष्टभक्तं तपस्यतः ॥ वैशाखशुक्लदशम्यां । घातिकर्मक्षये सति ॥ ३८ ॥

केवलज्ञानमुत्पन्नं । प्राकारत्रयमंडितं ॥ समवसरणं तस्य । चक्रुः शक्रादयः सुराः ॥३९॥ त्रिभिर्विशेषकं॥

त्यारे ऋजुवालिका नदीने किनारे श्यामाक नामना कुटुंबीना क्षेत्रमां ताडवृक्षनी नीचे ॥ ३७ ॥ गोदोहिका आसने रहेला अने छट्ठनो तप तपता एवा ते श्री महावीर प्रभुने वैशाख सुद दशमे घातिकर्मोनो क्षय थये छते ॥ ३८ ॥ केवलज्ञान उत्पन्न थयुं, तथा इंद्रआदिक देवोए तेमनुं त्रण प्राकारोथी शोभितुं समवसरण रच्युं. ॥ ३९ ॥

इंद्रभूतिरग्निभूति–र्वायुभूतिश्च गौतमाः ॥ व्यक्तः सुधर्मा मंडित–मौर्यपुत्रावकंपितः ॥ ४० ॥
अचलभ्राता मेतार्यः । प्रभासश्च पृथक्कुलाः ॥ एकादशैते वीरस्य । जज्ञिरे गणनायकाः ॥४१॥युग्मम्॥

गौतमगोत्रवाळा इंद्रभूति, अग्निभूति तथा वायुभूति, अने व्यक्त, सुधर्मा, मंडित, मौर्यपुत्र, अकंपित ॥ ४० ॥ अचलभ्राता, मेतार्य अने प्रभास नामना भिन्नभिन्न गोत्रवाळा, एम ते अगीआर गणधरो श्री वीरप्रभुना थया. ॥ ४१ ॥

यतीनां जज्ञिरे नेतुः । सहस्राणि चतुर्दश ॥ चंदनाद्याश्च षट्त्रिंश–त्सहस्राणि तपोधनाः ॥४२॥

वळी ते भगवानना चौद हजार साधुओ तथा चंदनाआदिक छत्रीस हजार साध्वीओ थइ. ॥ ४२ ॥

लक्षमेकोनषष्टिश्च । श्रावकाः शतकादयः ॥ अष्टादशसहस्राणि । लक्षास्तिस्त्र उपासिकाः ॥४३॥

तथा शतकआदिक एक लाख ओगणसाठ हजार श्रावको थया, तथा त्रण लाख अढार हजर श्राविकाओ थइ. ॥ ४३ ॥

चतुर्मासकसंख्याभू–द्व्रतादेवं जिनेशितुः ॥ तत्राद्यमस्थिके त्रीण्या–संश्चंपापृष्टचंपयोः ॥ ४४ ॥

॥१०॥

वळी भगवानना चोमासांओनी संख्या आ रीते थइ—त्यां पहेलुं अस्थिक गाममां, अने त्रण चंपा तथा पृष्टचंपामां थयां. ॥ ४४ ॥

वाणिजग्रामवैशाली–निश्रया द्वादशाभवन् ॥ राजगृहस्यनालंदा–पाटके च चतुर्दश ॥ ४५ ॥

वळी वैशाली नगरीनी पासे वाणिजगाममां बार, तथा राजगृही नगरीना नालंदा नामना पाडामां चौद चतुर्मासो थयां. ॥४५॥

षडज्ञुवन् मिथिलायां । भद्रिकायां द्वयं पुनः ॥ एकमालंभिकापुर्या–मेकं प्रणितज्ञुव्यभूत् ॥४६॥

छ मिथिलानगरीमां, अने बे भद्रिकानगरीमां, एक आलंभिकानगरीमां अने एक प्रणितभूमिमां थयुं. ॥ ४६ ॥

श्रावस्त्यामेकमेकं तु । पापापुर्यां जिनेशितुः ॥ हस्तिपालनरेंद्रस्य । संजातं ऋजुसंसदि ॥ ४७ ॥

एक श्रावस्तीनगरीमां अने पक पापानगरीमां हस्तिपाल राजानी लेखशालामां भगवाननुं चतुर्मास थयुं. ॥ ४७ ॥

चतुर्मास्यां तदा तस्यां । स्वायुः स्वल्पं विज्ञुर्विदन् ॥ लोकानुकंपया धर्मं । षोडश प्रहरान् जगौ॥४८॥

ते चतुर्मासमां ते वखते भगवाने पोतानुं स्वल्प आयु जाणीने लोकोपर अनुकंपा लावी शोळ पहोर सुधी धर्मदेशना आपी.॥४८॥

पुण्यपालस्तदा नंतुं । भूपः प्राप्तो ऽव्यजिज्ञपत् ॥ अष्टौ दृष्टा मया स्वप्ना । नाथ तेषामयं क्रमः॥४९॥

ते वखते प्रभुने वांदवामाटे आवेला पुण्यपाल राजाए विनंति करी के, हे प्रभु! में आठ स्वप्नो जोयां छे अने तेओनो अनुक्रम आ प्रमाणे छे–॥ ४९ ॥

जीर्णशालारतो हस्ती । कपिश्चापलयकारकः ॥ क्षीरद्रुः कंटकैर्व्याप्तो । न काका दीर्घिकाप्रियाः ॥५०॥

जीर्णशालामां आसक्त थयेलो हाथी, चपलता करनारो वानर, कांटाओथी भरेलुं खीजडानुं वृक्ष, वापिका जेमने प्रिय नथी एवा कागडा, ॥ ५० ॥

शबं सिंहं पराघृष्यं । पद्मोत्पत्तिरनास्पदे ॥ ऊषरे बीजवापश्च । हेमकुंभा मलाविलाः ॥ ५१ ॥

शबसरखो परंतु अन्योथी पराभव न पामतो एवो सिंह, अयोग्य स्थानके कमलोनी उत्पत्ति, ऊषर भूमिमां बीजनुं वाववुं, अने मेलथी लींपायेला सुवर्णना कलशो ( ए रीते आठ स्वप्नो में जोयां छे. ) ॥ ५१ ॥

तदेषां फलमाख्याहि । ज्ञानज्ञातजगत्त्रय ॥ वीरो राज्ञेति विज्ञप्तो । भावी तत्फलमादिशत् ॥५२॥

माटे ज्ञानथी जाणेल छे त्रणे जगतनो स्वभाव जेमणे एवा हे भगवन्! आप ए स्वप्नोनुं फल कहो? एम ते राजाए विनंति करवाथी श्रीवीरप्रभुए तेनुं ( नीचे मुजब ) फल कह्युं. ॥ ५२ ॥

दुःखदौर्गत्यदीनत्व–पीडारोगभयाश्रयः ॥ जीर्णशालासमो भावी । समयेन गृहाश्रयः ॥ ५३ ॥

काळे करीने गृहस्थाश्रम जीर्णशाला सरखो दुःख, दारिद्र्य, दीनता, पीडा, रोगो तथा भयवाळो थशे. ॥ ५३ ॥

गृहिगजो रतस्तत्र । दुःखेऽपि नादरिष्यति ॥ व्रतशालां सुखासेव्या–माहतामपि मोक्ष्यति ॥ ५४ ॥

अने तेमां आसक्त थयेलो गृहस्थरूपी हाथी दुःख थये छते पण सुखे सेववालायक एवी व्रतशालाने स्वीकारशे नही, तथा स्वीकारेली एवी पण ते व्रतशालानो त्याग करशे. ॥ ५४ ॥

कपिवच्चपलात्मान–स्तुच्छसत्वा अनाश्रयाः ॥ यतयो भाविनो ज्ञान–क्रियासु शिथिलादराः ॥५५॥

वळी मुनिओ वानरनी पेठे चपल स्वभाववाळा तुच्छ वीर्यवाळा अने स्वच्छंदी थइ ज्ञान अने क्रियामां शिथिलतावाळा थशे.।५५।

धर्मकृत्येषु ये शिक्षां । प्रदास्यंति दृढव्रताः ॥ ते तानुपहसिष्यंति । ग्राम्या ग्रामस्थपौरवत् ॥५६॥

वळी दृढ व्रतधारी एवा जे मुनिओ धर्मकार्योना संबंधमां जो तेमने शिखामण आपशे, तो गामडामां रहेला नागरिकनी जेम गांमडीयाओ तेम तेओनी तेओ हांसी करशे. ॥ ५६ ॥

सम्यग्ज्ञानक्रियाभक्ताः । शासनस्य प्रभावकाः ॥ सप्तक्षेत्रेषु दातारः । सच्चारित्रयतिप्रियाः ॥५७॥

क्षीरवृक्षसमाः श्राद्धा । लिंगिभिर्वंचनापरैः ॥ बब्बूलतुल्यै रोत्स्यंते । सर्वतोऽतुच्छमत्सरैः ॥ ५८ ॥ युग्मं ॥

उत्तम ज्ञान अने क्रियानी भक्तिवाळा, शासननो प्रभाव करनारा, साते क्षेत्रोमां दान आपनारा, अने उत्तम चारित्रयुक्त मुनिओप्रते प्रीति राखनारा ॥ ५७ ॥ एवा क्षीरवृक्षसरखा श्रावकोने ठगाइ करनारा अने सर्व जगोए अतिशय अदेखाइ करनारा एवा बावळसरखा वेषधारी मुनिओ ( धर्मकार्योमां ) अटकावशे. ॥ ५८ ॥

लिंगिनो न सहिष्यंते । महत्त्वमनगारिणां ॥ उपास्तिं वारयिष्यंति । रोत्स्यंति क्षेत्रपद्धतिं ॥५९॥

वळी तेवा वेषधारी मुनिओ साधुओनी महत्त्वाने सहन करशे नही, अने तेओनी उपासनाने निवारशे, तथा साते क्षेत्रोनी मर्यादाने अटकावशे. ॥ ५९ ॥

अतुच्छस्वच्छतोयायां । दीर्घिकायामिव ध्वांक्षाः ॥ गच्छे ज्ञानक्रियायुक्ते । न स्थास्यंति तपोधनाः ॥६०॥

अत्यंत निर्मल जलवाळी वावडीमां जेम कागडाओ क्रीडा करता नथी, तेम ज्ञान अने क्रियावाळा गच्छमां मुनिओ रहेशे नही ॥ ६० ॥

ततस्ते परगच्छेषु । श्लथाचारेषु सस्पृहाः ॥ यास्यंति पंडितंमन्या । मूढा धर्मार्थिनोऽपि हि ॥६१॥

वळी ते मूर्ख मुनिओ धर्मना अर्थी होवा छतां पण पंडिताइनो डोळ करताथका शिथिल आचारवाळा परगच्छोमां खुशी थइने जशे. ॥ ६१ ॥

न युक्तं भवतामेवं । विधानमिति चोदिताः ॥ साधुभिर्द्वेषयिष्यंति । रुष्टा दुष्टाशया जडाः ॥६२॥

तमारे आम करवुं योग्य नथी, एम उत्तम साधुओए कहेवाथी ते दुष्ट अभिप्रायवाळा मूर्ख मुनिओ क्रोध पामी तेओपर द्वेष करशे. ॥ ६२ ॥

जातिस्मृतितपोलब्धि-ज्ञानातिशयवर्जितं ॥ निःप्रभावं मतं सार्वं । भावि सिंहशवोपमं ॥ ६३ ॥

वळी सर्वज्ञप्रभुनुं आ शासन जातिस्मरण ज्ञान, तप, लब्धि तथा ज्ञानसंबंधि अतिशयविनानुं शबरूप सिंहसरखुं प्रभाव-विनानुं थशे. ॥ ६३ ॥

प्राक्प्रभावानुभावेन । श्वापदाभाः कुतीर्थिकाः ॥ एतत्पराभविष्यंति । न जातु तुच्छबुद्धयः ॥६४॥

परंतु पूर्वना प्रभावना माहात्म्यथी जंगली पशुओसरखा तुच्छबुद्धिवाळा कुतीर्थीओ ते जिनशासनने कोइ पण वखते पराभव करी शकशे नही. ॥ ६४ ॥

किंतु मध्ये समुत्पन्ना । नानामतप्ररूपणैः ॥ भेत्स्यंति भिक्षवः श्ववत् । सिंहस्वप्नफलं ह्यदः ॥६५॥

परंतु वच्चे उत्पन्न थयेला भिक्षुओ कुतरांनीपेठे विविध मतोनी प्ररूपणाथी शासनमां भेद पाडशे, ए रीतनुं सिंहना स्वप्ननुं फल छे. ॥ ६५ ॥

पद्माकरेषु पद्मानां । युक्तोत्पत्तिर्यथा तथा ॥ धार्मिकाणामपि प्रौढ-कुलोत्पत्तिः प्रशस्यते ॥ ६६ ॥

कमलोनी उत्पत्ति जेम सरोवरोमां युक्त छे, तेम धर्मी माणसोनी पण उत्तम कुलमां थयेली उत्पत्ति वखणाय छे. ॥६६॥

परं कालानुभावेन । भाविनस्तेऽधमे कुले ॥ अग्राह्यवचसो हीन-गोत्रत्वेन विगर्हिताः ॥ ६७ ॥

परंतु कालना प्रभावथी तेओ नीच कुलमां जन्मनारा, नही ग्रहण करवा योग्य वचनोवाळा तथा हीन गोत्रपणाथी निंदनीक थशे. ॥ ६७ ॥

**यथा कोऽप्यूषरे क्षेत्रे । मुग्धबुद्धिः कृषीवलः ॥ धान्यबीजानि वावति । शस्यसंपत्तिहेतवे ॥ ६८ ॥**

**तथा मूढधियो लोकाः । पात्रापात्रपरीक्षकाः ॥ अपात्रेषु प्रदास्यंति । पात्रबुद्ध्या धनं मुदा॥६९॥युग्मं॥**

वळी जेम कोइक बुद्धिरहित खेडुत धान्यनी संपत्तिमाटे ऊषर भूमिवाळां क्षेत्रमां धान्यनां बीज वावे छे, ॥ ६८ ॥ तेम मूढ बुद्धिवाळा तथा पात्र अने अपात्रनी परीक्षा नही करनार लोको अपात्रोने पात्रनी बुद्धिथी हर्षवडे धन आपशे. ॥ ६९ ॥

**प्रायः प्रीतिरपात्रेषु । दानबुद्धिश्च भाविनी ॥ साधूनुपहसिष्यंति । भिक्षादोषविवर्जकान् ॥ ७० ॥**

वळी प्रायें करीने अपात्रोप्रते दान आपवानी बुद्धि थशे, अने भिक्षाना दोषोने वर्जनारा साधुओनी तेओ हांसी करशे. ॥ ७० ॥

**ज्ञानादिगुणमाणिक्य-पूर्णाः स्वर्णघटोपमाः ॥ भाविनः साधवः स्वल्पाः । कालुष्याऽदूषिताशयाः॥७१॥**

वळी ज्ञानआदिक गुणोरूपी रत्नोथी भरेला, अने मलीनताथी रहित आशयवाळा स्वर्णना कळशसरखा स्वल्प साधुओ थशे. ॥ ७१ ॥

**श्लथज्ञानक्रियाचाराः । कलशा मलिना इव ॥ स्थाने स्थाने भविष्यंति । बहवो लिंगिनः पुनः॥७२॥**

वळी शिथिल थयेल छे ज्ञान अने क्रियाना आचारो जेमना एवा मलिन कलशसरखा घणा वेशधारीओ जगो जगोए प्रगट थशे. ॥ ७२ ॥

कलहं ते करिष्यंति । मत्सरेण महर्षिभिः ॥ उभयेषामपि तेषां । साम्यं लोके भविष्यति ॥७३॥

वळी तेवा वेषधारीओ ईर्ष्याथी महामुनिओ साथे क्लेश करशे, अने लोकोमां तेओ बन्नेनु तुल्यपणुं थशे. ॥ ७३ ॥

साम्येन व्यवहर्त्तारो । गीतार्था लिंगिभिः समं ॥ जलेन ग्रथिलेनेव । ग्रहिलोऽग्रहिलो जनः॥७४॥

वळी गीतार्थ मुनिओ तेवा वेषधारीओ साथे तेओ सरखा थइने वर्तशे. जेम जल पीवाथी घेला थयेला लोको साथे घेला थयेला लोको साथे घेला नही थयेला एवा राजा अने प्रधान वर्त्या हता. ॥ ७४ ॥

तथाहि पृथिवीपुर्यां । पूर्णो नाम महीपतिः ॥ सुबुद्धिस्तस्य चामात्यो । निधानं बुद्धिसंपदः॥७५॥

ते राजा तथा प्रधाननो संबंध कहे छे के—पृथिवी नामनी नगरीमां पूर्ण नामे राजा हतो, अने तेने बुद्धिनी संपदाना भंडार सरखो सुबुद्धि नामे प्रधान हतो. ॥ ७५ ॥

कालं तेनागमिष्यंतं । पृष्टोऽन्येद्युः सुबुद्धिना ॥ लोकदेव इति ख्यातो । नैमित्तिकवरोऽवदत् ॥७६॥

एक दिवसे ते सुबुद्धि प्रधाने लोकदेव नामना एक उत्तम निमित्तिआने भविष्यकाल संबंधि वृत्तांत पूछवाथी तेणे कह्युं के, ।७६।

मासादनंतरं मेघो । वर्षिता तज्जलं पुनः ॥ यः पास्यति स सर्वोऽपि । ग्रहग्रस्तो भविष्यति ॥७७॥

एक मासबाद वरसाद वरसशे, अने ते वरसादनुं जल जे पीशे, ते सघळा घेला थइ जशे. ॥ ७७ ॥

कियत्यपि गते काले । सुवृष्टिर्भाविनी पुनः ॥ सद्यः सज्जीभविष्यंति । तत्पयःपानतो जनाः ॥७८॥

वळी केटलोक काल गयाबाद उत्तम वृष्टि थशे, तेनुं पाणी पीवाथी तुरत लोको सारा थशे. ॥ ७८ ॥

राज्ञे मंत्री तदाचख्यौ । भेरीताडनपूर्वकं ॥ जनानां नृपतिर्वारि-संग्रहार्थमथादिशत् ॥ ७९ ॥

पछी प्रधाने ते हकीकत राजाने कही, तेथी राजाए ढंढेरो वगडावीने लोकोने जलनो संग्रह करवा माटे हुकम कर्यो.।७९।

जनः सर्वस्तथा चक्रे । ववर्षोक्तदिनेंबुदः ॥ कियत्यपि गते काले । संगृहीतांबु निष्टितं ॥ ८० ॥

पछी लोकोए पण तेम कर्युं, तथा कहेले दिवसे वरसाद थयो, तथा केटलोक वखत गयाबाद ते एकठुं करी राखेलुं पाणी खूटी गयुं. ॥ ८० ॥

अक्षीणसंगृहीतांबु-राजामात्यौ विनापरे ॥ सामंताद्याः पपुर्नव्यं । वारि वैकल्यकारकं ॥ ८१ ॥

तत्पीत्वा ग्रथिलाः सर्वे । ननृतुर्जहसुर्जगुः ॥ स्वैरं विचेष्टिरे मुग्धा । विना तौ राजमंत्रिणौ ॥८२॥युग्मं॥

एकठुं करी राखेलुं जल जेमतुं खूट्युं नथी एवा ते राजा अने प्रधान शिवायना सामंतआदिक सर्व लोकोए घेलछा करनारुं ते नवुं पाणी पीधुं ॥ ८१ ॥ अने ते पीने राजा अने मंत्रिविनाना घेला थयेला ते सघळा लोको नाचवा, हसवा, तथा गावा लाग्या, अने पोतानी इच्छामुजब वर्तवा लाग्या. ॥ ८२ ॥

**राजामात्यौ विसदृशौ । सामंताद्या निरीक्ष्य ते ॥ मंत्रयांचक्रिरे नूनं । ग्रथिलौ राजमंत्रिणौ ॥७३॥**

हवे ते सामंतआदिक लोको ते राजा अने प्रधानने पोताथी विपरीत आचरणवाळा जोइने विचारवा लाग्या के, खरेखर राजा अने प्रधान घेला थयेला छे. ॥ ८३ ॥

**अस्मद्विलक्षणाचारा–विमकावपसार्य तत् ॥ अपरौ स्थापयिष्यामः । स्वोचितौ राजमंत्रिणौ ॥७४॥**

माटे आपणथी विपरीत आचरणवाळा तेओ बन्नेने दूर करीने आपणने लायक एवा राजा तथा प्रधानने आपणे स्थापन करीशुं. ॥ ८४ ॥

**मंत्री ज्ञात्वेति तन्मंत्रं । नृपायाख्याज्जगाद सः ॥ आत्मरक्षा कथं कार्या । तेभ्यो वृंदार्हराजवत् ॥७५॥**

पछी प्रधाने तेओनो ते विचार जाणीने राजाने कह्युं त्यारे ते राजाए कह्युं के समूहने लायक एवा राजानी पेठे तेओथी आपणा आत्मानुं हवे शीरीते रक्षण करवुं. ? ॥ ८५ ॥

मंत्र्यूचे ग्रथिलीभूय । स्थातव्यं ग्रहिलैः सह ॥ प्राणोपायो न कोऽप्यन्य । इदं हि समयोचितं ॥८६॥

त्यारे प्रधाने कह्युं के, आपणे ते घेलाओनी साथे घेला थइने रहेवुं, केमके (ते शिवाय) बीजो कोइ प्राण बचाववानो उपाय नथी, माटे एम करवुं तेज समयोचित छे. ॥ ८६ ॥

कृत्रिमं ग्रहिलीभूय । ततस्तौ राजमंत्रिणौ ॥ तेषां मध्ये ववृताते । रक्षंतौ निजसंपदौ ॥ ८७ ॥

पछी ते राजा तथा प्रधान कृत्रिम घेलछा अंगीकार करीने पोतानी संपदानुं रक्षण करताथका तेओसाथे वर्तवा लाग्या. ॥८७॥

ततः सुसमये जाते । शुभवृष्टौ नवोदके ॥ पीते सर्वेऽभवन् स्वस्था । मूलप्रकृतिधारिणः ॥ ८८ ॥

पछी उत्तम समये उत्तम वृष्टि थवाथी, अने तेनुं नवुं पाणी पीवाथी तेओ सघळा मूल स्वभावने धारण करनारा स्वस्थ थया. ॥ ८८ ॥

एवं च दुष्षमाकाले । गीतार्था लिंगिभिः सह ॥ सदृशीभूय वर्त्स्यंते । भाविसुसमयेछवः ॥ ८९ ॥

एवी रीते आ दुःषमकालमां गीतार्थ मुनिओ भविष्यकालमां उत्तम समय (आववानी) इच्छावाळा थयाथका तेवा वेषधारीओनी साथे तेओना जेवा थइने वर्तशे. ॥ ८९ ॥

एवं स्वप्नफलं श्रुत्वा । गृहवासे विरागवान् ॥ स्वाम्यंते व्रतमादाय । पुण्यपालो गतो दिवं ॥ ९० ॥

ए रीते स्वप्नोनुं फल सांभळीने गृहस्थावासमां विरागवाळो एवो ते पुण्यपाल राजा प्रभुपासे दीक्षा लेइ देवलोके गयो. ।९०।

**श्रुत्वैवं विस्मितस्वांतः । स्वामिनं गौतमः प्रभुः ॥ भाविस्वरूपं पप्रच्छ । केवलालोकभास्करं ॥ ९१ ॥**

ए रीतनुं वृत्तांत सांभळीने हृदयमां विस्मय पामेला गौतमस्वामीए केवलज्ञानथी सूर्यसरखा एवा भगवानने भविष्यकालनुं स्वरूप पूछ्युं. ॥ ९१ ॥

**स्वाम्याह मम निर्वाणा–त्पंचमारोऽत्र गौतम ॥ एकोननवतौ पक्ष–ष्वतीतेषु लगिष्यति ॥ ९२ ॥**

त्यारे भगवाने कह्युं के, हे गौतम! मारां निर्वाण·पछी नेवाशी पखवाडीयां गयाबाद अहीं पांचमो आरो बेसशे. ॥९२॥

**वर्षैर्द्वादशभिर्मुक्तिं । गौतमो मम निर्वृतेः ॥ सुधर्मापि तथा गंता । शिवं विंशतिवत्सरैः ॥ ९३ ॥**

वळी मारां निर्वाणपछी बार वर्षे तमो गौतम मोक्षे जशो, तथा सुधर्मास्वामी पण वीश वर्षे मोक्षे जशे. ॥ ९३ ॥



**तथा वर्षैश्चतुःषष्ट्या । जंबूर्मुक्तिं गमिष्यति ॥ भावी दशानामर्थानां । विच्छेदोऽत्र ततो यथा ॥९४॥**

वळी चोसठ वर्षोबाद जंबूस्वामी मोक्षे जशे, अने दश वस्तुओनो अहीं विच्छेद थशे, अने ते आ प्रमाणे–॥ ९४ ॥

आहारकमनोज्ञाने । पुलाकपरमावधी ॥ क्षपकोपशमश्रेण्यौ । केवलं संयमत्रिकं ॥ ९५ ॥
सिद्धिगतिर्जिनकल्पो । जंबूनाम्ना समं तदा ॥ सह विच्छेदमेष्यंति । दुःषमाद्धानुभावतः ॥९६॥ युग्मं॥

आहारक शरीर, मनपर्यवज्ञान, पुलाकलब्धि, परमावधि, क्षपकश्रेणि, उपशमश्रेणि, केवलज्ञान, त्रण प्रकारनां संयम ।९५। मोक्षगति अने जिनकल्प, ए दश वस्तुओ दुःषमकालना प्रभावथी जंबूस्वामिनी साथेज विच्छेद पामशे. ॥ ९६ ॥

चतुर्दशपूर्वधारी । तस्य पट्टे प्रभावकः ॥ जंबूप्रबोधितः शिष्यो । भविता प्रभवप्रभुः ॥ ९७ ॥

तेमनी पाटे जंबूस्वामिए प्रतिबोधेला तथा चौद पूर्वोना धरनारा अने प्रभाविक एवा तेमना प्रभवस्वामी नामे शिष्य थशे ।९७।

शय्यंभवस्तु तत्पट्टे । भविता द्वादशांगभृत् ॥ दशवैकालिकोद्धारी । यशोभद्रश्च पूर्वभृत् ॥ ९८ ॥

पछी तेमनी पाटे द्वादशांगीने धरनारा अने दशवैकालिकनो उद्धार करनारा शय्यंभवस्वामी थशे, अने ते पछी चौद पूर्वधारी यशोभद्रसूरि थशे. ॥ ९८ ॥

संभूतिभद्रबाहू च । तच्छिष्यौ सर्वपूर्विणौ ॥ निर्वृत्तेर्मम सप्तत्या-धिके वर्षशते गते ॥ ९९ ॥

वळी मारां निर्वाणबाद एकसो सीतेर वर्षो गया बाद तेमना संभूतिविजय तथा भद्रबाहुस्वामी नामना चौद पूर्वधारी शिष्यो थशे. ॥ ९९ ॥

भद्रबाहुर्बहुग्रंथ-कर्त्ता स्वर्गं गमिष्यति ॥ स्थूलभद्रोऽथ संभूते-र्विनेयः सर्वपूर्वभृत् ॥ १०० ॥

घणा ग्रंथोना कर्ता भद्रबाहुस्वामी स्वर्गे जशे, अने ते पछी संभूतिविजयना शिष्य स्थूलभद्रजी सर्व पूर्वोने धरनारा थशे.

मोक्षतो मे पंचदशा-धिके वर्षे शतद्वये ॥ व्यतीते त्रिदिवं प्राप्ते । स्थूलभद्रमुनीश्वरे ॥ १ ॥

प्राक्संहननसंस्थाने । चतुःपूर्वी तथा शुभा ॥ ध्यानं सूक्ष्मं महाप्राणं । यास्यंति युगपद्व्ययं ॥२॥युग्मं॥

वळी मारां निर्वाणपछी बसो पंदर वर्षो गयाबाद स्थूलभद्र मुनिराज देवलोकमां गये छते ॥ १ ॥ पहेलुं संघयण तथा संस्थान, शुभ एवां चार पूर्वो अने महाप्राण नामनुं सूक्ष्म ध्यान एकीहारे नाश पामशे. ॥ २ ॥

वर्षैश्चतुरशीत्यभ्य-धिकैः पंचशतैर्गतैः ॥ व्युच्छेत्स्यते गते वज्रे । दशपूर्व्यर्द्धकीलिके ॥ ३ ॥

वळी पांचसो चोर्यासी वर्षो गयाबाद वज्रस्वामिनी हैयाती पछी दश पूर्वो [illegible] अर्धनाराच संघयणनो विच्छेद थशे. ॥३॥

वर्षैः षोडशभिर्युक्तैः । षट्शतैः पुष्पमित्रके ॥ सार्द्धानि नव पूर्वाणि । यास्यंति विलयं पुनः ॥ ४ ॥

वळी छसो शोळ वर्षो गयाबाद दुर्बलिका पुष्पमित्र आचार्यपछी साडानव पूर्वोनो पण विच्छेद थशे. ॥ ४ ॥

षड्भिर्वर्षशतैर्विंश-त्यधिकैर्मम मोक्षतः ॥ ग्राममध्ये विधास्यंति । वसतिं चार्यसूरयः ॥ ५ ॥



तेमज मारा मोक्ष पछी छसो वीश वर्षो गयाबाद आर्यसूरि गामनी अंदर निवास करशे. ॥ ५ ॥

नवोत्तरैः शतैः षड्भि-र्वत्सराणां दिगंबराः ॥ पाखंडिनो भविष्यंति । रथवीरपुरे पुरे ॥ ६ ॥

वळी छसो नव वर्षो वीत्याबाद रथवीरपुर नामना नगरमां पाखंडी एवा दिगंबरो थशे. ॥ ६ ॥

दिनतो मम मोक्षस्य । गते वर्षशतत्रये ॥ उज्जयिन्यां महापुर्यां । भावी संप्रतिभूपतिः ॥ ७ ॥

वळी मारा मोक्षना दिवसथी त्रणसो वर्षो गयाबाद उज्जयिनी नामनी महान् नगरीमां संप्रतिराजा थशे. ॥ ७ ॥

श्रीमदार्यसुहस्त्याह्व-सूरीणामुपदेशतः ॥ जातिस्मरणमासाद्य । जैनधर्मं स धास्यति ॥ ८ ॥

ते संप्रतिराजा श्रीमान् आर्यसुहस्ति नामना आचार्यना उपदेशथी जातिस्मरण ज्ञान पामीने जैनधर्म अंगीकार करशे. ॥८॥

दोर्दंडमंडलाक्रांत-त्रिखंडक्षोणिमंडलः ॥ ज्ञाता दाता नयी धर्मी । विनयी स पराक्रमी ॥ ९ ॥

पोताना भुजबलथी त्रण खंडोवाळुं पृथ्वीमंडल जीतीने ते राजा ज्ञानी, दानी, न्यायी, धर्मी तथा विनयी अने पराक्रमी थशे. ॥९॥

मुक्ताहारैरिव श्वेत-विहारैरर्हतां वरैः ॥ महीं महीयसीमेता-मखंडां मंडयिष्यति ॥ १० ॥

वळी ते राजा मोतीओना हारोवडे जाणे हेम नही? तेम जिनेश्वरप्रभुना उज्ज्वल मंदिरोथी आ महान पृथ्वीने अखंडितपणे शोभावशे. ॥ १० ॥

स नृपोऽनार्यदेशेषु । लोकोपकारहेतवे ॥ सम्यक्त्वोपासकाचार–शिक्षादक्षैर्विचक्षणैः ॥ ११ ॥
जिनागमविचारज्ञै–रुपदेशविशारदैः ॥ प्रहितैः सेवकैर्लोकान् । श्रावकान् कारयिष्यति ॥ १२ ॥ युग्मं ॥

वळी ते राजा अनार्य देशोमां लोकोना उपकारमाटे समकीती श्रावकोनो आचार शिखववामां चतुर, डाह्या ॥ ११ ॥ अने जिनागमोना विचारोने जाणनारा, तथा उपदेश आपवामां चतुर एवा पोताना सेवकोने मोकलीने त्यांना लोकोने श्रावको करावशे. ॥ १२ ॥

प्रतिबोधविधानार्थं । नृणां तत्र पवित्रधीः ॥ गीतार्थानां विहारं स । गुरुभिः कारयिष्यति ॥ १३ ॥

वळी पवित्र बुद्धिवाळो ते राजा त्यां लोकोने प्रतिबोध करवामाटे गुरुमहाराज मारफते गीतार्थोनो विहार करावशे. ॥ १३ ॥

एवं जिनोदितं धर्मं । सर्वदेशेषु शक्तितः ॥ प्रवर्त्य दृढधर्मः स । क्रमेण त्रिदिवंगमी ॥ १४ ॥

एवी रीते पोतानी शक्तिथी सर्व देशोमां जिनभाषित धर्मने प्रवर्तावीने दृढधर्मी एवो ते संप्रतिराजा अनुक्रमे देवलोकमां जशे. ॥ १४ ॥

मोक्षतो मम सप्तत्या । युते वर्षचतुःशते ॥ व्यतीते विक्रमादित्य । उज्जयिन्यां भविष्यति ॥ १५ ॥

वळी मारा मोक्षथी चारसो सीतेर वर्षो गयाबाद उज्जयिनी नगरीमां विक्रमादित्य राजा थशे. ॥ १५ ॥

 श्रीसिद्धसेनसूरीणा–मुपदेशं निशम्य सः ॥ सर्वज्ञशासने जक्त्या । प्राप्तसम्यक्त्वनिश्चयः ॥ १६ ॥ 

 सत्वसिद्धाग्निवैताल–प्रमुखानेकदैवतः ॥ विद्यासिद्धो मंत्रसिद्धः । सिद्धसौवर्णपूरुषः ॥ १७ ॥

धैर्यादिगुणविख्यातः । स्थाने स्थाने नरामरैः ॥ परीक्षाकषपाषाण–निघृष्टसत्वकांचनः ॥ १८ ॥

ससन्मानैः श्रियां दानै–रनृणामखिलामिलां ॥ कृत्वा संवत्सरं स्वस्य । वर्त्तयिष्यति भूतले ॥१९॥

चतुर्जिः कलापकं ॥

श्री सिद्धसेनसूरिनो उपदेश सांभळीने जिनेश्वरप्रभुना शासनमां भक्तिथी प्राप्त करेल छे सम्यक्त्वमां निश्चय जेणे एवो, ॥ १६ ॥ पोताना पराक्रमथी सिद्ध थयेल छे अग्निवेतालआदिक अनेक देवताओ जेने एवो, सिद्ध थयेली विद्याओवाळो, सिद्ध थयेल मंत्रोवाळो, सिद्ध थयेल सुवर्णपुरुषवाळो ॥ १७ ॥ धैर्य आदिक गुणोथी मख्यात थयेलो, जगो जगोए कसोटीपर सुवर्णनीपेठे मनुष्यो तथा देवोए जेना सत्वनी परीक्षा करेली छे एवो ॥ १८ ॥ ते विक्रमराजा सन्मानपूर्वक लक्ष्मीनुं दान आपीने समस्त पृथ्वीने करजरहित करी पृथ्वीतलपर पोतानो संवत मवर्तावशे. ॥ १९ ॥

गीर्वाणगणनुत्यध्वा–ध्वगीभूतगुणव्रजः ॥ पालयित्वा नयोपेतः । प्रास्तपापरजाः प्रजाः ॥ २० ॥
पंचत्रिंशद्युते तस्मा–द्वत्सराणां शते गते ॥ वर्त्तयिष्यत्युज्जयिन्यां । शकः संवत्सरं निजं ॥२१॥युग्मं॥

वळी देवोना समूहथी गवाइ रहेलो छे गुणोनो समूह जेनो एवो न्यायी शकराजा पापरूपी रजने दूर करीने तथा प्रजाने पालीने ॥ २० ॥ ते विक्रम राजाथी एकसो पांत्रीस वर्षो गयाबाद उज्जयिनीमां पोतानो संवत चलावशे. ॥ २१ ॥

पंचाशीत्या समधिकै–र्वर्षाणां पंचभिः शतैः ॥ विक्रमानेहसः सूरि–र्हरिभद्रो भविष्यति ॥ २२ ॥

वळी विक्रमसंवतना पांचसो पंच्याशी वर्षो गयाबाद हरिभद्रसूरि थशे. ॥ २२ ॥

मत्तोऽधिकैस्त्रिनवत्या । नववर्षशतैर्गतैः ॥ सूरयः कालकाह्वाना । भाविनः शक्रवंदिताः ॥ २३ ॥

वळी मारां निर्वाणथी नवसो त्राणु वर्षो गयाबाद इंद्रथी वंदायेला कालक नामना आचार्य थशे. ॥ २३ ॥

ते श्रीपर्युषणापर्व । चतुर्थ्यां पंचमीदिनात् ॥ सर्वाचार्यानुमत्यैव । समानेष्यंति हेतुतः ॥ २४ ॥

ते कालकाचार्य कारणथी सर्व आचार्योनी संमतिथीज पांचमना दिवसथी चोथमां पर्युषणापर्व लावशे. ॥ २४ ॥

द्वादशशतैर्वर्षाणां । सप्ततौ मम मोक्षतः ॥ बप्पभट्टिगुरुर्भावि । सर्वविद्याविशारदः ॥ २५ ॥

वळी मारा मोक्षपछी बारसो सीतेर वर्षो गयाबाद सर्व विद्याओना पारंगामी बप्पभट्टी नामना आचार्य थशे. ॥ २५ ॥

तद्वाक्यादामराजा मे । प्रतिमां गोपपर्वते ॥ कारयिष्यति सार्द्धत्रि-कोटीस्वर्णमयीं मुदा ॥ २६ ॥

तेमना वचनथी आमराजा गोपगिरिपर साडात्रण क्रोड सोनामोहोरोना खर्चवाळी मारी प्रतिमा हर्षथी करावशे. ॥२६॥

त्रयोदशशतैर्वर्षैः । प्रयाते मम मोक्षतः ॥ मतभेदा भविष्यंति । बहवो मोहहेतवे ॥ २७ ॥

वळी मारा मोक्षपछी तेरसो वर्षो गयाबाद मोहने लीधे घणा मत भेदो थशे. ॥ २७ ॥

विक्रमानेहसो याते-ष्वेकादशशतेष्वथ ॥ एकोनषष्ट्याधिकेषु । राकापक्षो भविष्यति ॥ २८ ॥

विक्रम संवतना अग्यारसो ओगणसाठ वर्षो गयाबाद पूनमीया पक्ष थशे. ॥ २८ ॥

वत्सरैर्द्वादशशतै-श्चतुर्भिरधिकैर्गतैः ॥ भावी विक्रमतो गच्छः । ख्यातः खरतराख्यया ॥ २९ ॥

वळी विक्रमथी बारसो चार वर्षो गयाबाद खरतर नामनो गच्छ मख्यात थशे. ॥ २९ ॥

शरद्भतैर्द्वादशभि-र्गतैस्त्रयोदशोत्तरैः ॥ राकापक्षात्पृथग्भूतों-चलपक्षो भविष्यति ॥ ३० ॥

वळी बारसो तेर वर्षो गयाबाद पूनमीया गच्छथी जूदो पडेलो अंचलगच्छ थशे. ॥ ३० ॥

षट्त्रिंशदधिकैर्वर्षै-र्गतैर्द्वादशभिः शतैः ॥ सार्द्धराकाभिधो गच्छो । महाशय भविष्यति ॥ ३१ ॥

वळी हे महाशय! बारसो छत्रीस वर्षो गयाबाद सार्धपूनमीया नामनो गच्छ थशे. ॥ ३१ ॥

पंचाशताधिकैर्वर्षै-र्गतैर्द्वादशभिः शतैः ॥ विक्रमानेहसो भावी । गच्छ आगमसंज्ञकः ॥ ३२ ॥

वळी विक्रमसंवतना बारसो पचास वर्षो गयाबाद आगम नामनो गच्छ थशे. ॥ ३२ ॥

नैकधामतभेदेन । दुःषमाद्धानुभावतः ॥ चतुरशीतिसंख्येया । गणभेदा हि भाविनः ॥ ३३ ॥

वळी दुःषमकाळना प्रभावथी अनेक प्रकारना मतभेदे करीने चोर्यासी संख्याना गच्छ भेदो थशे. ॥ ३३ ॥

केचित्तपोगौरविताः । केऽपि धर्मक्रियाश्लथाः ॥ क्रियावंतो भविष्यंति । परस्परसमत्सराः ॥ ३४ ॥

केटलाक तपना अभिमानवाळा, केटलाक धर्मक्रियामां शिथिल आदरवाळा अने परस्पर मत्सर धारण करनारा क्रियावाळा थशे. ॥ ३४ ॥

हुंडायामवसर्पिण्या-मेतस्यामभवन् दश ॥ तीर्थंकरोपसर्गादी-न्याश्चर्याणीह तद्यथा ॥ ३५ ॥

वळी आ हुंडाअवसर्पिणीमां अहीं तीर्थंकरप्रभुने उपसर्ग थवा आदिक दश आश्चर्यो थयां छे, ते आ प्रमाणे छे. ॥३५॥

उवसग्गगब्भहरणं । इत्थीतित्थं अभाविआ परिसा ॥ कन्हस्स अवरकंका । अवतरणं चंदसूराणं ॥३६॥

हरिवंसकुलोप्पत्ति । चमरोपाओ अ अट्ठसया सिद्धा ॥ असंजयाण पूआ । दसवि यणंतेण कालेणं ॥३७॥

तीर्थंकरोने उपसर्ग, महावीर प्रभुना गर्भनुं हरण, स्त्री तीर्थंकर, अभावित पर्षदा, कृष्ण वासुदेवनुं अपरकंकामां गमन, चंद्र सूर्यनुं नीचे आववुं, ॥ ३६ ॥ हरिवंश कुलनी उत्पत्ति, चमरेंद्रनो उत्पात, एकसो आठनुं सिद्ध थवुं, असंयतिओनो पूजासत्कार, ए दशे आश्चर्यो अनंते काले थयेलां छे. ॥ ३७ ॥

**कषायबहुला लोका । दुष्षमायामतः परं ॥ भाविनस्त्यक्तमर्यादा । नष्टधर्मधियो जडाः ॥ ३८ ॥**

वळी हवेथी आ दुःषमकालमां लोको घणा कषायोवाळा, मर्यादाविनाना, धर्मबुद्धिरहित अने मूर्ख थशे. ॥ ३८ ॥

**कालेन हीयमानेन । कुतीर्थिमतिमोहिताः ॥ परोपकारसत्यादि-वर्जिता भाविनो जनाः ॥ ३९ ॥**

वळी आ पडता काळमां कुतीर्थिओनी बुद्धिथी मोहित थयेला लोको परोपकार तथा सत्यआदिक विनाना थशे. ॥३९॥

**पुराणि ग्रामरूपाणि । ग्रामाः प्रेतवनोपमाः ॥ यमदंडसमा भूपा । महेभ्या भृत्यसन्निभाः ॥४०॥**

नगरो गांमडांजेवां, गामो श्मशान जेवां, राजाओ यमना दंड सरखा अने महोटा शाहुकारो चाकरो सरखा थशे. ॥४०॥

**न दृश्या भाविनो देवा । न जातिस्मरणं नृणां ॥ जनो विगतमर्यादः । क्षुद्रसत्वाकुलाचला ॥४१॥**

देवो प्रत्यक्ष देखाशे नही, माणसोने जातिस्मरण ज्ञान थशे नही, लोको मर्यादा विनाना अने पृथ्वी क्षुद्र प्राणीओथी व्याकुल थशे. ॥ ४१ ॥

परविघ्नेन संतुष्टः । पापारंभे चतुर्भुजः ॥ निजार्थेन जनोऽन्येषां । न स्वमध्ये प्रवेशकः ॥ ४२ ॥

वळी लोको पोताना धनथी अन्यने विघ्न करवामां संतोषवाळा, पापकार्य करवामां शूरवीर, तथा बीजी ( हलकी ) जातिओमां गमन करनारा अने स्वजातिने तजनारा थशे. ॥ ४२ ॥

प्रमादी पुण्यकृत्येषु । परतप्तिषु तत्परः ॥ वंचनाचतुरस्तुच्छः । प्रचंडो दीर्घरोषणः ॥ ४३ ॥

वळी तेओ पुण्यकार्योमां प्रमादवाळा, परने पीडा करवामां तत्पर, ठगवामां चतुर, तुच्छ स्वभाववाळा, भयानक अने घणा क्रोधवाळा थशे. ॥ ४३ ॥

लोभी मिथ्याभिमानी च । राजर्ध्या पादमोचकः ॥ पाखंडिनो भविष्यंति । बहवो विप्रतारकाः ॥४४॥

वळी तेओ लोभी अने मिथ्या अभिमानवाळा अने राजलक्ष्मीना गर्वथी ( बीजाओनी आजीविकापर ) पग मूकनारा थशे, तेमज घणा ठगाइ करनारा पाखंडीओ थशे. ॥ ४४ ॥

धूर्त्ताः पापाकरा मूर्त्ताः । स्फुरिष्यंति पदे पदे ॥ त्रपात्यक्ताऽपमर्यादा । वेश्यावत्कुलयोषितः ॥४५॥

वळी पापिष्ट धूर्तो पगले पगले प्रगटी निकळशे, अने कुलिन स्त्रीओ पण वेश्याओ सरखी लज्जारहित तथा मर्यादाविनानी थशे. ॥ ४५ ॥

भूपा भृत्यान् जनान् भृत्या । लोकास्तान् द्वितयानपि ॥ श्रौद्‌यंतीह महीपीठे । मात्स्यो धर्मः प्रवर्त्स्यति ॥ ४६ ॥

राजाओ ( पोताना ) नोकरोने, ते नोकरो लोकोने, अने लोको तेओ बन्नेने रंजाडशे, तथा पृथ्वीतलपर मात्सिक न्याय ( महोटो मत्स्य जेम न्हाना मत्स्यनुं भक्षण करी जाय तेम ) प्रवर्तशे. ॥ ४६ ॥

चौराश्चौर्यविधानेन । करैर्भूमीश्वराः पुनः ॥ जनं दरिद्रयिष्यंति । वह्नयोऽपि प्रदीपनैः ॥ ४७ ॥

चोरलोको चोरी करीने, राजाओ करो नाखीने, अने अग्नि आगवडे करीने लोकोने दरिद्री बनावशे. ॥ ४७ ॥

वधो धेन्वादिजंतूनां । पातनं देवसद्मनां ॥ मर्त्यमुंरुकरो दंडो । भाव्येवं दुःखितो जनः ॥ ४८ ॥

गायआदिक प्राणीओनो घात थशे, देवमंदिरो पाडी नखाशे, मनुष्योपर मुंडकावेरो तथा दंड पडशे, अने ए रीते लोको दुःखी थशे. ॥ ४८ ॥

दुर्भिक्षैर्भयमरैर्दौःस्थ्यै–रसौम्यैर्जनमारिभिः ॥ भाविनी मेदिनी शून्या । देशभंगादिविप्लवैः ॥४९॥

वळी दुकाळ, भय, दारिद्य, भयंकर मरकी तथा देशभंगआदिक उपद्रवोथी पृथ्वी उज्जड थशे. ॥ ४९ ॥



प्रेतलोकसमाः श्रेण्यो । लंचालुब्धा नियोगिनः ॥ अविवेकी जनो मूर्खो । विह्वलो निर्द्धनः सुधीः ॥५०॥

बजारो श्मशानजेवी (शून्य) थशे, (राजाना) कारभारीओ लांचीया थशे, लोको विवेक विनाना, मूर्ख अने चिंतातुर थशे, तथा बुद्धिवान निर्धन थशे. ॥ ५० ॥

दारिद्र्यवंतो दातारः। कृपणा धनिकाः पुनः ॥ पापात्मानश्चिरायुष्काः। कृतिनः स्वल्पजीविनः ॥५१॥

दातार पुरुषो निर्धन, अने कृपण लोको धनवान थशे, पापी माणसो लांबा आयुवाळा तथा धार्मिक लोको स्वल्प आयुवाळा थशे. ॥ ५१ ॥

अकुलीना महीपालाः। कुलीना नृपसेवकाः ॥ दुःखिनो भाविनः संतो। दुर्जनाः सुखिनः पुनः॥५२॥

हीन कुलवाळा राजाओ, तथा कुलिनलोको राजाना सेवको थशे, सज्जनो दुःखी, अने दुर्जनो सुखी थशे. ॥ ५२ ॥

एवं च दुःषमाकाल-स्वरूपं लौकिका अपि ॥ व्याहरंति कलियुग-व्यपदेशेन तद्यथा ॥ ५३ ॥

वळी अन्यदर्शनीओ पण कलियुगना नामथी दुःषमकालनुं स्वरूप एवी रीते कहे छे, अने ते नीचे प्रमाणे छे. ॥ ५३ ॥

द्वापराख्ये युगे जज्ञे। युधिष्ठिरमहीपतिः ॥ राजपाट्यान्यदा सोऽथ। जगाम विपिने क्वचित् ॥५४॥

द्वापर नामना युगमां युधिष्ठिर नामे राजा थया, अने ते एक समये घोडा खेलाववामाटे कोइक वनमां गया. ॥ ५४ ॥

तत्राधोभूय वत्सायाः। स्तन्यपानं वितन्वतीं॥ गां निरीक्ष्य द्विजाः पृष्टा। राज्ञा किमिदमद्भुतं॥५५॥

त्यां वाछरडीजी नीचे रहीने गायने स्तनपान करती ( धावती ) जोइने ते राजाए ब्राह्मणोने पूछयुं के, आ आश्चर्य शुं छे? ॥ ५५ ॥

तैर्विज्ञायोदितं राज-न्नागामिनि कलौ युगे ॥ हीनसत्वाः श्रिया दुःस्था। मातरः पितरस्तथा॥५६॥

त्यारे तेओए ( पोताना ज्ञानथी ) जाणीने कह्युं के, हे राजन्! हवे आवनारा कलियुगमां मातापिताओ हीनपराक्रमवाळा तथा लक्ष्मीथी दरिद्र थशे. ॥ ५६ ॥

कस्यापि धनिनः कन्यां। दत्वा लात्वा ततो धनं॥ करिष्यंति स्वनिर्वाहं। गोवत्साधीतिजं फलं॥५७॥

तथा कोइक धनवानने ( पोतानी ) कन्या आपी, अने (तेना बदलामां) तेनी पासेथी धन लेइ पोतानो निर्वाह करशे, ए रीते वाछरडीने गाये धाववानुं फल जाणवुं. ॥ ५७ ॥

ततोऽग्रतो गतेनाथ। युधिष्ठिरमहीभुजा ॥ समश्रेणिश्रितं दृष्टं। जलपूर्णं सरस्त्रयं ॥ ५८ ॥

त्यांथी आगळ गयेला ते युधिष्ठिर राजाए सरखी सपाटीए रहेलां अने जलथी भरेलां त्रण तळावो जोयां. ॥ ५८ ॥

तटाकादेकतस्तत्रो-त्पत्य त्यक्त्वांतरा सरः ॥ दृष्टास्तृतीयकासारे। पतंतो भूभृतोर्मयः ॥ ५९ ॥

तेमां एक तळावमांथी उछळेला मोजांओ वचला तळावने छोडीने त्रीजा तळावमां पडता ते राजाए जोया. ॥ ५९ ॥

तद्वीक्ष्य विस्मितः प्राह । विप्रान् किमिदमद्भुतं ॥ ते विमृश्य जगुर्भावि । स्वरूपं ज्ञापयत्यदः ॥६०॥

ते जोइ आश्चर्य पामेला राजाए ब्राह्मणोने पूछयुं के, वळी आ शुं आश्चर्य छे? त्यारे तेओए विचारिने कह्युं के, आ बनाव पण भविष्यकाळनुं स्वरूप जणावे छे. ॥ ६० ॥

यथासन्नं सरस्त्यक्त्वा । तृतीयं वीचयः श्रिताः ॥ निजांस्त्यक्त्वा तथान्येषु । लोकः प्रीतिं करिष्यति ।६१।

जेम आ मोजाओ नजदीकनुं तळाव छोडीने त्रीजा तळावमां पड्या, तेम लोको पण पोताना स्वजनोने छोडीने बीजा लोकोमां प्रीति करशे. ॥ ६१ ॥

भूपेनाग्रगतेनाथ । जलार्द्रवालुकोत्करैः ॥ मानवै रज्जवो व्यूता । दृष्टा भग्नाः प्रभंजनैः ॥ ६२ ॥

वळी आगळ चालता एवा ते राजाए जलथी भीनी थयेली वेळुना समूहथी माणसोए गुंथेली दोरीओने वायुथी त्रुटी गयेली जोइ. ॥ ६२ ॥

निरीक्ष्येदं द्विजाः पृष्टाः । फलमाहुर्नरा धनं ॥ कृष्यादिभिर्महाक्लेशै-रर्जिष्यंति कलौ युगे ॥६३॥

ते जोइ ब्राह्मणोने पूछवाथी तेओए तेनुं फल कह्युं के, कलियुगमां लोको खेतीआदिक घणां कष्टोथी धन उपार्जन करशे.॥६३॥



तदग्निचौरदायाद-राजदंडकरादिभिः ॥ नरैर्यत्नेन संरक्ष्य-माणं क्षिप्रं विनंक्ष्यति ॥ ६४ ॥

वळी ते धननुं लोकोए प्रयत्नथी रक्षण करतां छतां पण अग्नि, चोर, कुटुंबीओ, राजदंड तथा करआदिकथी तेनो नाश थशे. ॥ ६४ ॥



पुनरग्रे प्रयातेन । धर्मपुत्रेण वीक्षितं ॥ अवाहोत्तुंचितं नीरं । निपतत्कूपकंदरे ॥ ६५ ॥

वळी आगळ चालेला ते युधिष्ठिरे कोशथी उपर खेंचेलुं पाणी कुवामां पाछुं पडतुं जोयुं. ॥ ६५ ॥

फलं तस्य द्विजैरूचे । कृष्यादिक्लेशतो नराः ॥ यदर्जिष्यंति तद् द्रव्यं । ग्रहिष्यंत्यखिलं नृपाः ॥६६॥

तेनुं फल ब्राह्मणोए कह्युं के, खेती आदिकना प्रयासथी माणसो जे द्रव्य कमाशे, ते सघळुं राजाओ लेइ लेशे. ॥ ६६ ॥

युगेष्वन्येषु राजानो । धनं दत्वा निजं बहु ॥ जगतीं प्रीणयामासु–र्जनतैकांतवत्सलाः ॥ ६७ ॥

बीजा युगोमां तो राजाओ प्रजापर अतिशय प्रेम राखीने पोतानुं घणुं धन आपी जगतने खुशी करता हता. ॥ ६७ ॥

राज्ञा पुनर्गतेनाग्रे । सश्रीकश्चाम्रकस्तरुः ॥ शमी शाखी चैकदेशे । वनमध्ये निरीक्षितौ ॥ ६८ ॥

वळी आगळ गयेला ते राजाए वननी अंदर एकज भागमां शोभावाळुं आंबानुं वृक्ष तथा खीजडानुं वृक्ष जोयुं. ॥ ६८ ॥

जनैः शमीतरोस्तत्र । गंधमाल्यविलेपनं ॥ मंडनं गीतनृत्यादि । क्रियमाणं व्यलोक्यत ॥ ६९ ॥

त्यां ते खीजडाना वृक्षने लोकोवडे करीने सुगंधिओ, पुष्पमालाओ, विलेपन, आभूषण तथा गायन नृत्य आदिकथी पूजातुं जोयुं. ॥ ६९ ॥

**पत्रपुष्पफलाढ्यस्य । छत्राकारस्य शाखिनः ॥ आम्रस्य च न पूजादि । द्विजास्तत्फलमूचिरे ॥७०॥**

परंतु पत्रो, पुष्पो तथा फलोथी समृद्ध थयेला, अने छत्र सरखा आकारवाळा ते आम्रवृक्षनुं पूजन आदिक न जोयुं, त्यारे ब्राह्मणोए तेनुं नीचे मुजब फल कह्युं. ॥ ७० ॥

**न श्रीः पूजा गुणवतां । सज्जनानां महात्मनां ॥ पापिष्टानां खलानां च । पूजालक्ष्म्यौ भविष्यतः॥७१॥**

गुणवान तथा सज्जन एवा महात्माओनी शोभा के पूजा थशे नही, परंतु पापी अने दुष्टोनी पूजा अने शोभा थशे. ॥७१॥

**पुनः शिलैका वालाग्र-लंबिता नभसि स्थिता॥ निरीक्षिता क्षितीशेना-चख्युस्तस्य फलं द्विजाः॥७२॥**

वळी वालना अग्र भागथी आकाशमां लटकावी राखेली एक शिला राजाए जोइ, अने तेनुं फल ब्राह्मणोए आ प्रमाणे कह्युं.—॥ ७२ ॥

**पापं कलौ शिलाकल्पं । स्वल्पधर्मेण भूपते ॥ वालावलंबतुल्येन । जनोऽयं निस्तरिष्यति ॥ ७३ ॥**

हे राजन्! आ कलियुगमां पाप शिला जेवुं थशे, परंतु वालना अवलंबन सरखा स्वल्प धर्मथी आ लोको ( संसार सागरथी ) तरशे. ॥ ७३ ॥

वालाग्रे त्रुटिते धर्मे । ब्रुडिष्यंति जनाः समे ॥ फलार्थं तरुपातस्य । त्वद्दृष्टस्य फलं त्विदं ॥ ७४॥

परंतु वालना अग्रभागसरखा ते धर्मनो ज्यारे नाश थशे, त्यारे सघळा लोको ( संसारसागरमां ) बुडशे. वळी फलने माटे वृक्षने उखेडातुं जे तमोए जोयुं, तेनुं फल आ प्रमाणे छे-॥ ७४ ॥

पितुर्वृक्षेण तुल्यस्य । फलेन सदृशः सुतः ॥ धनाद्यर्थं वधप्राय-मुद्वेगं जनयिष्यति ॥ ७५ ॥

फल सरखो पुत्र धन आदिकमाटे वृक्ष सरखा पिताने मारी लुंटी लेवा सरखो उपद्रव करशे. ॥ ७५ ॥

वर्यान्नपचनार्हायां । क्षितीशेन समीक्षितः ॥ लोहमय्यां कटाह्यां च । पाको मांसादिवस्तुनः॥७६॥

उत्तम अनाज पकाववालायक लोखंडनी कडाइमां राजाए मांस आदिक वस्तुने पकावाती जोइ. ॥ ७६ ॥

प्राहुस्तस्य फलं विप्राः । स्वजातिपरिहारतः ॥ परवर्गे नरे शीर्ष-दानं प्रीतिश्च भाविनी ॥ ७७ ॥

तेनुं फल ब्राह्मणोए कह्युं के, पोतानी ज्ञातिने तजीने लोकोनी परज्ञातिना मनुष्यपर मस्तक आपवासुधिनी पण प्रीति थशे. ॥७७॥

सर्पसुपर्णयोः पूजा-ऽपूजे वीक्ष्य फलं त्वदः ॥ निर्दयेष्वपि धर्मेषु । सर्पतुल्येषु सत्कृतिः ॥ ७८ ॥

वळी तमोए जे सर्पनी पूजा अने गरुडनी अपूजा जोइ, तेनुं फल एवुं छे के सर्प सरखा निर्दय धर्मोमां पण लोकोनो सत्कार थशे. ॥ ७८ ॥

सुपर्णाभेषु पूज्येषु । सत्क्रियाधर्मशालिषु ॥ गुणज्ञेष्वप्यसत्कारो-ऽनादरश्च भविष्यति ॥ ७९ ॥

अने गुरुडसरखा पूजनीक तथा उत्तम क्रियायुक्त धर्मथी शोभता तथा गुणोने जाणनारा, एवा पुरुषो प्रते असत्कार तथा अनादर थशे. ॥ ७९ ॥

गजवाह्यं खरवाह्यं । शकटं यत्समीक्षितं ॥ फलं तस्येदमुच्चेषु । कुलेषु गजशालिषु ॥ ८० ॥

मर्यादास्यंदनोद्वाह-योग्येषु कलहोऽनिशं । नीतिलोपस्तथान्योन्यं । मत्सरश्च भविष्यति ॥८१॥युग्मं॥

वळी हे राजन्! हाथी जोडवालायक रथमां तमोए जे गधेडा जोडेला जोया, तेनुं फल आ प्रमाणे छे-हाथी सरखां उत्तम कुलो, ॥ ८० ॥ के जेओ मर्यादारूपी रथने खेंचवालायक छे, तेओमां हमेशां क्लेश, नीतिनो लोप तथा परस्पर ईर्ष्या थशे. ॥ ८१ ॥

कुलेष्वन्येषु नीचेषु । खरतुल्येषु भूपते ॥ मर्यादानीतिधारित्वं । स्नेहोऽन्योन्यं भविष्यति ॥ ८२ ॥

तथा हे राजन्! बीजां गधेडा सरखां नीच कुलोमां मर्यादा नीतिनुं धरवापणुं तथा परस्पर स्नेह थशे. ॥ ८२ ॥

स्नेहभावो वालुकासु । त्वया नृप विलोकितः ॥ कृषिसेवादिकारंभा-त्तत्फलं भावि नो घनं ॥८३॥

वळी हे राजन्! तमोए वेलुमां जे चीकाश जोइ, तेथी खेती तथा नोकरीआदिकना आरंभथी घणुं फल थशे नही. ॥८३॥

अग्रे गतेन भूपेन । काकं हंसैर्निषेवितं ॥ दृष्ट्वा पृष्टैर्द्विजैः प्रोचे । तत्फलं भाविसूचकं ॥ ८४ ॥

वळी आगळ गयेला राजाए हंसोथी सेवायेला कागडाने जोइने पूछवाथी ब्राह्मणोए भविष्य सूचवनारुं तेनुं (नीचेमुजब) फळ कह्युं ॥ ८४ ॥

काककल्पा महीपालाः । प्रायो नीचकुलोद्भवाः ॥ हंसतुल्यैर्जनैः शुद्धैः । सेविष्यंते कलौ युगे ॥८५॥

प्रायें करीने कलियुगमां नीच कुळमां उत्पन्न थयेला कागडा सरखा राजाओ थशे, अने हंस सरखा शुद्ध मनुष्योथी तेओ सेवाशे. ॥ ८५ ॥

अन्यदा पांडवाः पंच । वनवासस्थिताः क्रमात् ॥ युधिष्ठिरेण भीमाद्या । निशि रक्षाकृतः कृताः ॥८६॥

एक वखते पांचे पांडवो वनवासमां रह्या हता, त्यां रात्रिये भीम आदिकोने अनुक्रमे युधिष्ठिरे रक्षण करनारा स्थाप्या.।८६।

भीमस्य जाग्रतः पूर्व-यामे सुप्ते युधिष्ठिरे ॥ बंधुत्रययुतेऽभ्यागा-त्प्रेतरूपधरः कलिः ॥ ८७ ॥

त्यां पहेले पहोरे त्रणे भाइओ सहित युधिष्ठिर सुता, अने भीम जागता रह्या, ते वखते कलियुग प्रेततुं रूप धारण करीने आव्यो. ॥ ८७ ॥

आगत्य तमुवाचाथ । बंधून् ते हन्मि पश्यतः ॥ तदाकर्ण्य क्रुद्धो भीम–स्तद्वधायाभ्यधावत ॥८८॥

तेणे आवीने ते भीमने कह्युं के, तारा देखतां आ तारा बंधुओने हुं मारुं छुं. ते सांभळी क्रोध पामेलो भीम तेने मारवा माटे दोड्यो. ॥ ८८ ॥

विदधानो युद्धं भीमः । क्रुधारुणितलोचनः ॥ लीलया प्रेतरूपेण । कलिना बलिना जितः ॥८९॥

पछी क्रोधथी लाल आंखोवाळा अने युद्ध करता एवा ते भीमने बलवान तथा प्रेततुं रूप धारण करनारा एवा ते कलिए क्रीडामात्रमां जीती लीधो. ॥ ८९ ॥

युध्यमानो जितस्तेन । द्वितीये प्रहरेऽर्जुनः ॥ तृतीये नकुलस्तद्व–त्सहदेवस्तुरीयके ॥ ९० ॥

पछी बीजे पहोरे युद्ध करता एवा अर्जुनने तेणे जीत्यो, तथा त्रीजे पहोरे नकुलने अने चोथे पहोरे सहदेवने पण ते कलिए जीत्या. ॥ ९० ॥

ततः सुतेषु शेषेषु । निशाशेषे युधिष्ठिरः ॥ जजागार कलिस्तस्या–प्यूचे प्रेतः समुत्थितः ॥ ९१ ॥

पछी शेष रात्रि रह्ये छते चारे भाइओ सुताबाद युधिष्ठिर जागवा लाग्या, त्यारे ते प्रेतरूप कलिए उठीने तेने पण कह्युं के,।९१।

हन्मि ते पश्यतो बंधू-नित्याकर्ण्य सकर्णधीः ॥ न चुकोप न चोवाच । रुषा रूक्षाक्षरं वचः ॥९२॥

तारा देखतां हुं आ तारा भाइओने मारुं छुं, ते सांभळी ते विचक्षण युधिष्ठिर कोप्या नही, तेम क्रोधथी तेने कडवो शब्द पण कह्यो नही. ॥ ९२ ॥

सर्वाभ्युदयजननीं । सर्वसत्वप्रियंकरीं ॥ सारां समग्रधर्मस्य । क्षमामंगीचकार सः ॥ ९३ ॥

सर्व उन्नतिने करनारी, सर्व प्राणीओने वहाली, तथा सर्व धर्मना साररूप क्षमाने तेणे धारण करी. ॥ ९३ ॥

तस्योपशममालोक्य । कलिः शांतमनास्ततः ॥ प्रेतरूपं व्यपास्यास्य । मुष्टिमध्ये समागतः ॥९४॥

एवी रीते ते युधिष्ठिर राजाना उपशमभावने जोइने शांत मनवाळो कलि प्रेतनुं स्वरूप छोडीने तेमनी मूठीमां आवी रह्यो.।९४।

उत्थितानां स्वबंधूनां । प्रातस्तेन प्रदर्शितः ॥ वशीभूतः कलिः प्रेतः । क्षमाया अनुभावतः ॥९५॥

पछी प्रभाते उठेला एवा पोताना भाइओने क्षमाना प्रभावथी वश थयेला ते कलिने युधिष्ठिरे बताव्यो. ॥ ९५ ॥

इत्याद्यष्टोत्तरशत-दृष्टांतैर्लौकिका अपि ॥ पुराणादिषु व्याख्यंति । भावितुर्ये स्थितिं युगे ॥ ९६ ॥

ए रीते एकसो आठ दृष्टांतोवडे करीने अन्यदर्शनीओ पण पुराणआदिमां हवे आवनारा चोथा कलियुगनी स्थिति वर्णवे छे।९६।

सुखोपस्थो ग्रहो नैव। न च लज्जा भविष्यति ॥ नाकलंकं कुलं भावि। सारवस्तुक्षतिः क्षितौ ॥९७॥

सुखे साधी शकाय एवो उद्यम (लोकोने) मळशे नही, अने लज्जा पण थशे नही, कलंकविनानुं कोइ कुल रहेशे नही, अने पृथ्वीपरथी उत्तम वस्तुनो विनाश थशे. ॥ ९७ ॥

सुते मृत्युः पिता जीवी। पितरौ विनयोज्झिताः ॥ सुताः पराभविष्यंति। श्वश्रूं चाविनयाः स्नुषाः ॥९८॥

पुत्र मृत्यु पामशे, अने पिता जीवशे, तेमज पुत्रो विनयरहित थयाथका पिताने दुःख आपशे, अने वहुरुओ अविनयी थइथकी सासुने रंजाडशे. ॥ ९८ ॥

विप्राः शस्त्रभृतो वेद–पाठषट्कर्मवर्जिताः ॥ अपूज्या भाविनः पूज्याः। पूज्या अपूजनान्विताः ॥९९॥

ब्राह्मणो वेदपाठ तथा ( पोताना ) षट्कर्मथी रहित थई शस्त्रो धारण करशे, नही पूजवालायक पूजाशे, अने पूजवालायक पूजा रहित थशे. ॥ ९९ ॥

गुरून्नाराधयिष्यंति। विनेयास्तेषु ते पुनः ॥ हिताचारोपदेशं न। प्रदास्यंति कथंचन ॥ २०० ॥

शिष्यो गुरुने आराधशे नही, अने ते गुरुओ पण तेओने कोइपण प्रकारे हितकारी आचरणनो उपदेश आपशे नही.।२००।

मंत्रतंत्रौषधज्ञान-रत्नविद्याधनायुषां ॥ फलपुष्परसादीनां । रूपसौभाग्यसंपदां ॥ १ ॥ सत्वसंह-
ननस्थेम्नां । यशःकीर्त्तिगुणश्रियां ॥ हानिः क्रमेण भावानां । भाविनी पंचमारके ॥ २ ॥ युग्मं ॥

वळी मंत्र, तंत्र, औषधी, ज्ञान, रत्न, विद्या, धन, आयु, फल, पुष्प, रसआदिक, रूप, सौभाग्य, संपत् ॥ १ ॥ वीर्य, शरीरनो बांधो, बळ, यश, कीर्ति, गुणो तथा लक्ष्मीनी अनुक्रमे आ पांचमा आरामां हानि थशे. ॥ २ ॥

दानशीलतपोभाव-रूपधर्मस्य संक्षयः ॥ कूटतुला कूटमानं । शाठ्यं धर्मेऽपि भावि च ॥ ३ ॥

दान, शील, तप अने भावरूपी धर्मनो नाश थशे, तोलां तथा मापां खोटां थशे, अने धर्ममां पण लुचाइ थशे. ॥ ३ ॥

देवत्वं नैव देवेषु । सतीत्वं न सतीष्वपि ॥ निःसंगेषु न वैराग्यं । निःस्पृहं न तपोऽपि हि ॥ ४ ॥

देवोमां देवपणुं रहेशे नही, सतीओमां पण सतीपणुं रहेशे नही, निःसंगी मुनिओमां वैराग्य रहेशे नही, अने तप पण लालचविनानो थशे नही. ॥ ४ ॥

सत्यशौचतपःक्षांत्या-दीनां हानिर्दिने दिने ॥ भूमिः स्वल्पफला मेघाः । काले चाप्यजलप्रदाः ॥५॥

सत्य, पवित्रता, तप अने क्षमाआदिकनी दिवसे दिवसे हानि थशे, पृथ्वी स्वल्प फलवाळी थशे, अने वर्षाकाळमां पण वरसाद जल आपनारो थशे नही. ॥ ५ ॥

स्वाम्याख्याति सुसौराष्ट्र–लाटगूर्जरसीमनि ॥ क्रमेण नगरं भावि । नाम्नाणहिल्लपाटकं ॥ ६ ॥

वळी भगवान कहे छे के सौराष्ट्र, लाटदेश अने गुजरातना सीमाडापर अनुक्रमे अणहिल्लपुरपाटण नामनुं नगर थशे.।६।

अस्मन्निर्वाणतो वर्ष–शतानि वत्स षोडश ॥ नवषष्टिश्च यास्यंति । यदा तत्र पुरे तदा ॥ ७ ॥

कुमारपालभूपाल–श्चौलुक्यकुलचंद्रमाः ॥ भविष्यति महाबाहुः । प्रचंडाखंडशासनः ॥ ८ ॥ युग्मं ॥

अने ते नगरमां मारां निर्वाणबाद शोळसो ओगणोतेर वर्षो ज्यारे व्यतीत थशे त्यारे ॥ ७ ॥ चौलुक्यवंशमां चंद्रमा-सरखा, महापराक्रमी, तथा प्रचंड अने अखंडित आज्ञावाळा कुमारपाल नामे राजा थशे. ॥ ८ ॥

पराक्रमेण धर्मेण । दानेन दययाज्ञया ॥ कीर्त्या गुणानुरागेण । नयेन विनयेन च ॥ ९ ॥

विज्ञानेन विवेकेन । धैर्येण राज्यलीलया ॥ सोऽद्वितीयो नृपो भावी । महासत्वोचितैर्गुणैः ॥१०॥युग्मं॥

पराक्रम, धर्म, दान, दया, आज्ञा, कीर्ति, गुणोनो अनुराग, न्याय, विनय, ॥ ९ ॥ विज्ञान, विवेक, धैर्यपणुं, राजलीला, तथा अतिशय बलने लायक एवा गुणोवडे करीने ते अनुपम राजा थशे. ॥ १० ॥

कौबेरीमातुरुष्कं स । प्राचीमात्रिदशापगां ॥ याम्यामाविंध्यमावार्ध्धिं । पश्चिमां साधयिष्यति ॥११॥

उत्तरमां तुर्कस्थान सुधी, पूर्वमां गंगानदी सुधी, दक्षिणमां विंध्याचलपर्वत सुधी अने पश्चिममां छेक समुद्र सुधीनी पृथ्वीने ते जीतशे. ॥ ११ ॥

एकादशशतानीभा । रथास्तस्यायुतप्रमाः ॥ एकादश हया लक्षाः । पत्त्यष्टादशलक्षकाः ॥ १२ ॥

ते राजाने अग्यारसो हाथीओ, दश लाख रथो, अग्यार लाख घोडा अने अढार लाख पायदळनुं लश्कर थशे. ॥ १२ ॥

सोऽन्यदा वज्रशाखायां । मुनिचंद्रकुलोद्भवं ॥ श्रीहेमचंद्रमाचार्यं । वंदिता मेदिनीपतिः ॥ १३ ॥

पछी एक दिवसे वज्रशाखाना मुनिचंद्रसूरिना कुलमां थयेला श्रीहेमचंद्र नामना आचार्य महाराजने ते वंदन करशे. ।१३।

निशम्य रम्यश्रीधर्मो–पदेशं तन्मुखान्नृपः ॥ श्राद्धव्रतानि सम्यक्त्व–सहितानि ग्रहिष्यति ॥१४॥

उत्तम लक्ष्मीवाळा ते कुमारपाळ राजा तेमना मुखथी धर्मनो उपदेश सांभळीने सम्यक्त्वसहित श्रावकनां ( बार ) व्रतो ग्रहण करशे. ॥ १४ ॥

अपूजितेषु देवेषु । गुरुष्वप्रणतेषु च ॥ न भोक्ष्यते स धर्मज्ञः । प्रपन्नोपासकव्रतः ॥ १५ ॥

ए रीते श्रावकनां व्रतो स्वीकारीने धर्मने जाणनारा ते राजा देवपूजन कर्याविना तथा गुरुमहाराजने वांद्याविना भोजन करशे नही. ॥ १५ ॥

प्रतिडुंगं प्रतिग्रामं । प्रायेण सुप्रभावकः ॥ निर्मास्यति महीमेनां । जिनप्रासादमंडितां ॥ १६ ॥

जिनशासननी उत्तम प्रभावना करनारा एवा ते राजा प्रायें करीने दरेक शहेरमां तथा दरेक गाममां जिनमंदिर बंधावी आ पृथ्वीने तेओवडे शोभिती करशे. ॥ १६ ॥

सैकदा श्रीहेमसूरि–मुखात्तीर्थकथाक्षणे ॥ जीवतः स्वामिनो मूर्त्तेः । संबंधं निशमिष्यति ॥ १७ ॥

वळी ते राजा एक वखते तीर्थकथाना व्याख्यान समये श्रीहेमचंद्राचार्यना मुखथी जीवंतस्वामिनी मूर्तिनो अधिकार सांभळशे. ॥ १७ ॥

ततो वीतभयस्थाने । धूलिदुर्गं खनंखनं ॥ नरैराप्तैः प्रतिमां तां । स प्रादुःकारयिष्यति ॥ १८ ॥

पछी ते राजा वीतभय नामना नगरने स्थानके धूळना टेकराने खोदावी खोदावीने पोताना विश्वासु माणसो मारफते ते प्रतिमाने प्रकट करावशे. ॥ १८ ॥

प्रतिमां पत्तने नीत्वा । प्रासादस्थां विधाय सः ॥ मंस्यते पुण्यधीर्धीरः । साक्षाद्वीरजिनेश्वरं ॥१९॥

पछी ते प्रतिमाने पाटणमां लावीने तथा जिनमंदिरमां पधरावीने पुण्यबुद्धिवाळा, तथा धैर्यवंत एवा ते कुमारपाल राजा ते प्रतिमाने साक्षात् वीरप्रभु तरीके मानशे. ॥ १९ ॥

तदा तस्यै प्रतिमायै । यदुदायनभूभुजा ॥ ग्रामाणां शासनं दत्तं । तदप्याविर्भविष्यति ॥ २० ॥

वळी ते प्रतिमा माटे उदायन राजाए ते वखते आपेलुं गामोनुं शासनपत्र पण प्रगट थशे. ॥ २० ॥

शासनं तादृशं तस्यै । सोऽपि भूपः प्रदास्यति ॥ वंदिष्यते च तां नित्यं । महापूजापुरस्सरं ॥२१॥

तेवुंज शासनपत्र ते प्रतिमा माटे ते कुमारपाल राजा पण आपशे, अने ते प्रतिमाने ते महापूजापूर्वक हमेशां वंदन करशे.।२१।

सदा स्वदारसंतोषी । त्रिधा वर्षासु शीलवान् ॥ शीलस्य मनसा भंगे। सोपवासं करिष्यति ॥२२॥

हमेशां पोतानी स्त्रीमांज संतोषवाळा, तथा वर्षाकाळमां मन, वचन अने कायाथी शील पालनारा, ते राजा मनथी पण शीलनो भंग थतां उपवास करशे. ॥ २२ ॥

पुरा भरतनाभाक-श्रीरामैः यदकारि च ॥ तद्विधाता विपुत्राया । धनालाभं कृपापरः ॥ २३ ॥

वळी ते दयाळु राजा पूर्वे जेम भरतराजा, नाभाकराजा तथा रामचंद्रजीए करेलुं छे, तेम पुत्ररहित प्रजानुं धन ग्रहण करशे नहीं. ॥ २३ ॥

अष्टादशसु देशेषु । मारीव्यसनवारकः ॥ सैन्याभिषेणनत्यागं । स वर्षासु करिष्यति ॥ २४ ॥

अढार देशोमां ते जीवहिंसा तथा साते दुर्व्यसनोनो अटकाव करशे, तथा वर्षाकालमां ते लश्करसाथे लडाइ करवानो त्याग करशे. ॥ २४ ॥

प्राणित्राणप्रवीणानां । शांतिजीमूतनेमिनां ॥ कुमारपालभूपाल–स्तुरीयः पंचमारके ॥ २५ ॥

प्राणीओनुं रक्षण करवामां तत्पर एवा शांतिनाथ, मेघरथ तथा नेमिप्रभु पछी पांचमा आरामां आ कुमारपाल राजा चोथो थशे. ॥ २५ ॥

आर्हतः क्ष्मापतिः शुद्ध–व्रतसम्यक्त्वपालकः ॥ कुमार इव भावी कः । शासनस्य प्रभावकः ॥२६॥

शुद्ध व्रतो तथा सम्यत्वने पालनारा एवा ते जैनधर्मी कुमारपालराजा सरखा शासनना प्रभाविक बीजा कोण राजा थशे? ।२६।

कलहकरा डमरकरा । असमाहिकरा अनिव्वुइकरा य ॥ होहिंति इब समणा । दससु खित्तेसु सयराहं ॥ २७ ॥

वळी अहीं दशे क्षेत्रोमां क्लेश करनारा, उपद्रव करनारा, अशांति करनारा, तथा उद्वेग करनारा सेंकडोगमे श्रमणो थशे. ।२७।

ववहारमंततंताइ–एसु निच्चुज्जुआण य मुणीणं ॥ गलिहिंति आगमब्बा । अबलुद्धाणतद्दिअहं ॥२८॥

वळी ते समयथी मुनिओ धनना लोभी थयाथका व्यापार, मंत्र, तथा तंत्र आदिकमां हमेशां उद्यमवंत थशे, अने तेथी तेओ आगमोनो अर्थ विसरी जशे. ॥ २८ ॥

उवगरणवब्बपत्ताणं । आणावसहाण सड्ढयाणं च ॥ जुग्भिस्संति कएणं । जह नरवइणो कुडंबीणं ॥२९॥

वळी राजाओ जेम खेडुतो साथे तकरार करे, तेम ते साधुओ जिनाज्ञा पालनारा श्रावको साथे उपकरणो, वस्त्रो तथा पात्रो लेवा माटे तकरार करशे. ॥ २९ ॥

बहवे मुंडा अप्पे। समणा होहिंत गुणसयाइन्ना ॥ बलवंता मिछनिवा। अप्पबला हिंदुअनरिंदा ॥३०॥

